# श्यामला दण्डकं

॥ ध्यानम् ॥
माणिक्य वीणा मुपलालयन्तीं मदालसां मञ्जुलवाग्विलासाम् ।
माहेन्द्रनील द्युति कोमलाङ्गीं मातङ्गकन्यां मनसा स्मरामि ॥ १॥

चतुर्भुजे चन्द्रकलावतंसे कुचोन्नते कुङ्कुमराग शोणे ।
पुण्ड्रेक्षु पाशाङ्कुश पुष्पबाण हस्ते, नमस्ते जगदेकमातः ॥ २॥

माता मरकतश्यामा मातङ्गी मदशालिनी ।
कुर्यात् कटाक्षं कल्याणी कदंबवन वासिनी ॥ ३॥

जय मातङ्ग तनये जय नीलोत्पल द्युते ।
जय सङ्गीत रसिके जय लीला शुकप्रिये ॥ ४॥

॥ दण्डकम् ॥
जय जननि सुधासमुद्रान्त रुद्यन्मणीद्वीप संरूढ् -
बिल्वाटवी मध्य कल्पद्रुमाकल्प कादंब कान्तार वासप्रिये
कृत्तिवासप्रिये, सर्वलोकप्रिये...

सादरारब्ध संगीत संभावना संभ्रमालोल-
नीप स्रगाबद्ध चूली सनाथत्रिके, सानुमत्पुत्रिके...

शेखरीभूत शीतांशु रेखा मयूखावली बद्ध-
सुस्निग्ध नीलालक श्रेणि शृङ्गारिते, लोक संभाविते...

कामलीला धनुस्सन्निभ भ्रूलता पुष्प सन्दोह सन्देह
कृल्लोचने, वाक्सुधासेचने...

चारु गोरोचना पङ्क केली ललामाभिरामे, सुरामे रमे..

प्रोल्लसद्ध्वालिका मौक्तिक श्रेणिका चन्द्रिका मण्डलोद्भासि
लावण्य गण्डस्थल न्यस्त कस्तूरिका पत्ररेखा समुद्भूत सौरभ्य-
संभ्रान्त भृङ्गाङ्गना गीत सान्द्री भवन्मन्द्र तन्त्रीस्वरे,
सुस्वरे भास्वरे...

वल्लकी वादन प्रक्रिया लोल ताली दलाबद्ध-
ताटङ्क भूषा विशेषान्विते, सिद्ध सम्मानिते...

दिव्य हालामदोद्वेल हेलालसच्चक्षु रान्दोलनश्री समाक्षिप्त कर्णैक-
नीलोत्पले श्यामले पूरिताशेष लोकाभि वाञ्छाफले, श्रीफले...

स्वेद बिन्दूल्लसद्फाल लावण्य निष्यन्द सन्दोह सन्देह
कृन्नासिका मौक्तिके सर्वविश्वात्मिके, सर्वसिद्ध्यात्मिके कालिके...

मुग्द्ध मन्दस्मितोदार वक्त्र-स्फुरत् पूग ताम्बूल कर्पूर खण्डोत्करे
ज्ञानमुद्राकरे सर्वसम्पत्करे पद्मभास्वत्करे, श्रीकरे...

कुन्द पुष्प द्युति स्निग्ध दन्तावली निर्मला लोल कल्लोल
सम्मेलन स्मेर शोणाधरे चारु वीणाधरे, पक्व बिंबाधरे...

सुललित नवयौवनारंभ चन्द्रोदयोद्वेल लावण्य दुग्धार्ण
वाविर्भवत् कम्बु बिम्बोक भृत्कन्थरे, सत्कलामन्दिरे मन्थरे...

दिव्य रत्न प्रभा बन्धुरच्छन्न हारादि भूषा समुद्योत
मानानवद्याङ्ग शोभे, शुभे...

रत्नकेयूर रश्मिच्छटा पल्लव प्रोल्लस द्दोल्लता राजिते,
योगिभिः पूजिते...
विश्व दिङ्मण्डल व्याप्त माणिक्य तेजस्स्फुरत् कङ्कणालंकृते
विभ्रमालंकृते, साधुभिः पूजिते...

वासरारंभ वेला समुज्जृम्भ माणारविन्द प्रतिद्वन्द्वि पाणिद्वये,
सन्ततोद्यद्दये अद्वये...

दिव्य रत्नोर्मिका दीधिति स्तोम सन्ध्याय मानाङ्गुली पल्लवोद्य
न्नखेन्दु प्रभामण्डले सन्नुताखण्डले चित्प्रभामण्डले, प्रोल्लसत्कुण्डले...

तारकाराजि नीकाश हारावलि स्मेर चारु स्तनाभोग भारानमन्मध्य-
वल्लीवलिच्छेद वीचीसमुल्लास सन्दर्शिताकार सौन्दर्य रत्नाकरे
वल्लकी भृत्करे, किङ्कर श्रीकरे...

हेम कुंभोपमोत्तुङ्ग वक्षोज भारावनम्रे त्रिलोकावनम्रे
लसद्वृत्त गंभीर नाभी सरस्तीर शैवाल शङ्काकर श्याम
रोमावली भूषणे, मञ्जु संभाषणे...

चारु शिञ्चत्कटीसूत्र निर्भर्त्सि तानङ्ग लीला धनुश्शिञ्चिनी

डंबरे, दिव्य रत्नाम्बरे...

पद्मरागोल्लस न्मेखला मौक्तिक श्रोणि शोभाजित स्वर्ण
भूभृत्तले, चन्द्रिका शीतले...

विकसित नव किंशुका ताम्र दिव्यांशुकच्छन्न चारूरु शोभा पराभूत
सिन्दूर शोणायमानेन्द्र मातङ्ग हस्मार्ग्गले, वैभवानर्ग्गले श्यामले...

कोमलस्निग्द्ध नीलोत्पलोत्पासि तानङ्ग तूणीर शङ्काकरोदार
जंघालते, चारुलीलागते...

नम्रदिक्पाल सीमन्तिनी कुन्तल स्निग्द्ध नीलप्रभापुञ्ज सञ्जात दुर्वाङ्कु
राशङ्क सारंग संयोग रिंख न्नखेन्दूज्ज्वले, प्रोज्ज्वले निर्मले...

प्रह्व देवेश लक्ष्मीश भूतेश तोयेश वाणीश कीनाश दैत्येश यक्षेश
वाय्वग्नि कोटीर माणिक्य संहृष्ट बालातपोद्दाम लाक्षारसारुण्य
तारुण्य लक्ष्मी गृहिताङ्घ्रि पद्म्मे, सुपद्मे उमे...

सुरुचिर नवरत्न पीठस्थिते सुस्थिते, रत्नपद्मासने रत्नसिम्हासने
शङ्खपद्म द्वयोपाश्रिते विश्रुते, तत्र विघ्नेश दुर्गा वटु क्षेत्रपालै र्युते,
मत्तमातङ्ग कन्या समूहान्विते, मञ्चुला मेनकाद्यङ्ग नामानिते,
भैरवैरष्टभि र्वेष्टिते...

देवि वामादिभिः शक्तिभि स्सेविते, धात्रि लक्ष्म्यादि शक्त्यष्टकैः संयुते,
मातृका मण्डलै र्मण्डिते, यक्षगन्धर्व सिद्धाङ्गना मण्डलै रर्चिते...

पञ्चबाणात्मिके, पञ्चबाणेन रत्या च संभाविते, प्रीतिभाजा वसन्तेन चानन्दिते भक्तिभाजं परं श्रेयसे कल्पसे, योगिनां मानसे द्योतसे...

छन्द सामोजसा भ्राजसे, गीत विद्या विनोदाति तृष्णेन कृष्णेन सम्पूज्यसे भक्ति मच्चेतसा वेधसा स्तूयसे, विश्वहृद्येन वाद्येन विद्याधरै र्गीयसे...

श्रवणहरण दक्षिणक्काणया वीणया किन्नरै र्गीयसे
यक्षगन्धर्व सिद्धाङ्गना मण्डलै रर्च्यसे, सर्वसौभाग्य वाञ्छावतीभिर् वधूभिस्सुराणां समाराध्यसे...

सर्वविद्या विशेषात्मकं चाटु गाथा समुच्चारणा कण्ठ मूलोल्लसद्-वर्ण राजित्रयं, कोमल श्यामलोदार पक्षद्वयं, तुण्डशोभाति दूरीभवत् किंशुकं तं शुकं, लालयन्ती परिक्रीडसे...

पाणि पद्मद्वये नाक्षमालामपि स्फाटिकीं ज्ञानसारात्मकं पुस्तकञ्चङ्कुशं पाश माबिभ्रती तेन सञ्चिन्त्यसे, तस्य वक्त्रान्तरात् गद्यपद्यात्मिका भारती निस्सरेत्...

येन वाध्वंसनादा कृति र्भाव्यसे तस्य वश्या भवन्ति स्तियः पूरुषाः
येन वा शातकुंब द्युति र्भाव्यसे, सोऽपि लक्ष्मी सहस्रैः परिक्रीडते...

किन्न सिद्ध्येद्वपुः श्यामलं कोमलं चन्द्र चूडान्वितं तावकं ध्यायतः, तस्य लीला सरोवारिधीः, तस्य केलीवनं नन्दनं, तस्य भद्रासनं भूतलं, तस्य गीर्देवता किङ्करि, तस्य चाज्ञाकरी श्री स्वयं...

सर्व तीर्थात्मिके सर्व मन्त्रात्मिके सर्व यन्त्रात्मिके सर्व तन्त्रात्मिके सर्व चक्रात्मिके सर्व शक्त्यात्मिके सर्व पीठात्मिके सर्व वेदात्मिके सर्व विद्यात्मिके सर्व योगात्मिके सर्व वर्णात्मिके सर्व गीतात्मिके सर्व नादात्मिके सर्व शब्दात्मिके सर्व विश्वात्मिके सर्व वर्गात्मिके सर्व सर्वात्मिके सर्वगे सर्व रूपे जगन्मातृके पाहि मां,
पाहि मां पाहि मां...
देवि तुभ्यं नमो देवि तुभ्यं नमो देवि तुभ्यं नमो देवि तुभ्यं नमः

॥ इति श्यामला दण्डकम् सम्पूर्णम् ॥